दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढशुक्लएकादशी
श्रावण ०१ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-275 | 1 | जुलाई 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 लाहौल-क्षेत्रे प्रचलन्ति 'टैक्सी'-वाहने पतितः पर्वतः, नवजातेन सह १३ जनानां कारुणिका मृत्युः

3 सरदार-पटेल-विश्वविद्यालय-मण्डी-नगरे 'दीक्षारम्भ-२०२६' कार्यक्रमस्य भव्यः शुभारम्भः

5 मुख्यमंत्रिणा धामिना जनसमस्यानां त्वरिताय समयबद्धसमाधानाय दत्तः निर्देशः

## पाकिस्तानावृत-कश्मीर-क्षेत्रे मानवाधिकार-हननस्य भारतेन तीव्रविरोधः



पाकिस्तानावृत-जम्मू-कश्मीर-क्षेत्रे जायमानस्य अत्याचारस्य सहैव मानवाधिकार-हननस्य संयुक्तराष्ट्रसङ्घेन कृताम् उपेक्षामादाय भारतेन तीव्रः खेदः प्रकटीकृतः ।संयुक्तराष्ट्रसङ्घ भारतस्य स्थायी प्रतिनिधिः हरीश-पर्वतनेनि इत्यसौ प्रावोचत् यत्, अन्येषु देशेषु एतादृशाणां घटनाक्रमाणां संयुक्तराष्ट्रसङ्घेन तीव्रनिन्दा क्रियते, परञ्च पाकिस्ताने जायमानेषु एतादृशेषु कृत्येषु अवधानं नैव प्रदीयते। सः शान्तिपूर्ण-विवाद-निवारण-तन्त्राणां सुदृढीकरणम् इति विषये आयोजितेसुरक्षा-परिषदः मुक्तविवाद-कार्यक्रमे भाषमाणः आसीत्। सुरक्षा परिषदः अस्यां चर्चायां पाकिस्तानेन पुनः कश्मीर-प्रकरणं समुत्थापितम्, यस्य भारतेन दृढं प्रत्याख्यानम् कृतम्। पर्वतनेनि इत्यसौ पाकिस्तानस्योपरि आरोपितवान् यत् सः तत्रत्य-जनानाम् अधिकाराणां दमनं करोति ।

## नीट-युजी-प्रकरणे सर्वोच्च-न्यायालयस्य केन्द्र-सर्वकारं प्रति कठोरनिर्देशः




सर्वोच्चन्यायालयः 'नीट्-युजी' प्रश्नपत्र-गोप्यताभंग-प्रकरणे केन्द्रीय-प्रशासनं 'राष्ट्रिय-परीक्षा-अभिकरणञ्च' परीक्षा-परिष्काराणां अनुष्ठान-प्रगतिमालक्ष्य विशद-शपथपत्रं उपस्थापयितुम् समादिदेश। धर्मपीठेन ससम्भ्रमं प्रोक्तं यत् ते विषयस्यास्य अतिसूक्ष्म-दृष्ट्या साक्षाद्-ईक्षणं विधास्यन्ति, अनवरतं च अस्य अनुगमनं करिष्यन्ति। अपि च, शीर्ष न्यायालयः सर्वकारं प्रति साक्षेपं प्राक्षिपत् यत् परीक्षा-प्रक्रियां सर्वथा आभासीय-सरण्याम् अनुवर्तयितुं सर्वकारेण किं किम् अनुष्ठीयते?

# परीक्षा-अनाचार-रोधनार्थं कठोर-विधेयकस्य मन्त्रिमण्डलेन स्वीकृतिः






केन्द्रीय-मन्त्रिमण्डलेन प्रश्नपत्र-गोप्यताभंग अथ परीक्षा-अनाचार प्रकरणानां द्रुत-न्यायालयानां संस्थापनाय सहैव कठोर दण्डस्य विधानाय एकस्य प्रारूप-विधेयकस्य स्वीकृतिः प्रदत्ता। संसद् भवने प्रधानमन्त्रिणः नरेन्द्र मोदिनः अध्यक्षतायां सम्पन्ने मन्त्रिमण्डलीयोपवेशने अस्य प्रारूप-विधेयकस्य अनुमोदनं कृतम्।

**कर्णाटक-आन्ध्र-प्रदेशयोः मध्ये बल्लारी-गुन्तकल-रेल-परियोजनाय अनुमोदनम्**

केन्द्रीय-मन्त्रिमण्डलस्य आर्थिक कार्य-समित्या कर्णाटक-आन्ध्रप्रदेश राज्ययोः मध्ये स्थितस्य बल्लारी-गुन्तकल-रेल-खण्डस्य-रेल-पथ-पङ्क्तेः निर्माण-प्रस्तावाय स्वीकृतिः प्रख्यापिता। अद्य अपराह्णे नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् सूचना-तथा-प्रसारण-मन्त्री अश्विनी वैष्णवः अब्रवीत् यत् एषा परियोजना आन्ध्रप्रदेश-कर्णाटक-राज्ययोः मध्ये गमनागमन-सम्पर्क भृशं दृढयिष्यति। एषा कार्य-योजना 'प्रधानमन्त्री-गतिशक्ति-राष्ट्रिय-महा-योजनायाः' आधारेण परिकल्पिता अस्ति, यस्याः मुख्यं लक्ष्यम् तावत् एकीकृत-नियोजनेन तथा हितधारकाणां परामर्शः बहु-माध्यमिक सम्पर्कस्य अथ संभार-दक्षतायाः समभिवृद्धिः अस्ति। एषा परियोजना कर्णाटक-आन्ध्रप्रदेशयोः त्रिणि जनपदानि व्याप्नोति। अस्य बहु-मार्ग निर्माणस्य प्रभावेन प्रायः सप्त-लक्ष-जनसङ्ख्या-युक्तानाम् नवनवति ग्रामाणां सम्पर्क-सुविधा अत्यन्तं सुगमा भविष्यति ।

**नीट-प्रश्नपत्र-गोप्यता-विषये नड्डा-जितेन्द्र-सिंहयोः सी.जे.पी-प्रतिनिधिमण्डलेन सह चर्चा**

केन्द्रीय-मन्त्री जे.पी. नड्डा डॉ. जितेन्द्र सिंहः चेत्येतौ नवदिल्ली-नगरे सी.जे.पी प्रतिनिधिमण्डलेन सह अमिलताम्। सम्मेलनात् परं वार्ताहरैः सह भाषमाणः श्रीनड्डा अवदत् यत्, उपवेशन-काले तैः परीक्षा प्रणाल्यां परिष्काराणां विषये तैः सी.जे.पी-प्रतिनिधिमण्डलस्य याचनाः धैर्यपूर्वकं श्रुताः, श्रीनड्डा अवोचत् यत् प्रतिनिधिमण्डलेन तिस्रः मुख्याः याचनाः उपस्थापिताः सहैव प्रश्नपत्र-गोप्यता-प्रकटनस्य रोधनाय केचन उपायाः अपि प्रतिपादिताः। केन्द्रीय मन्त्री समेधितवान् यत् सर्वकारः श्वः प्रतिनिधिमण्डलेन सह पुनः द्वितीय चरणस्य वार्ता करिष्यति ।

## भारत-रोमानिया-देशयोः मध्ये आर्थिक-निवेश-सम्बन्धानाम् विस्तारणाय राष्ट्रपति-मुर्मू-आह्वानम्



भारतस्य राष्ट्रपतिपदासीना द्रौपदी मुर्मुः भारत-रोमानिया-देशयोः मध्ये आर्थिक-निवेश-सम्बन्धानाम् विस्तारणाय आह्वानम् अकरोत्। तया प्रोक्तं यत् द्वयोः राष्ट्रयोः मध्ये गभीर-वाणिज्यिक सहयोगाय अदूषिता अनन्ता च क्षमता विद्यते। बुखारेस्ट-नगरे 'भारत-रोमानिया-व्यापार-मञ्चम्' सम्बोधयन्ती राष्ट्रपती अवोचत् यत् रोमानिया-देशस्य सामरिक अवस्थितिः, दक्षा कर्मशक्तिः, यूरोपियन सङ्घेन सह तस्य सुदृढ-एकीकरणञ्च भारतस्य कृते विशाल-यूरोपीय विपणेः प्रवेश-द्वारञ्च विधत्ते । राष्ट्रपती मुर्मू- प्रावोचत् यत् प्रस्तावितम् 'भारत-यूरोपीय सङ्घ-मुक्त-व्यापार-विधानम्' व्यापार-निवेशयोः समभिवृद्ध्या तथा च अक्षीण-प्रदाय-श्रृङ्खलायाः पोषणेन आर्थिक-सम्बन्धानाम् द्रढीकरणे एकं ऐतिहासिक प्रस्तर चिह्नम् सेत्स्यति ।

## सुभाषितम्

**आमरणान्ताः प्रणयाः,**
**कोपास्तत्क्षणभङ्गुराः।**
**परित्यागाश्च निःसङ्गा,**
**भवन्ति हि महात्मनाम्॥**
**(हितोपदेश, मित्रलाभ- १९२)**

अर्थात्- महात्माओं का स्नेह मरने तक, क्रोध केवल क्षणमात्र और परित्याग केवल संगरहित होता है अर्थात् वे कुछ बुरा नहीं करते हैं।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विश्व-कनिष्ठ-स्क्वाश-प्रतियोगितायाः उपान्त्य-चक्रं प्राप्य अनाहत-सिंहस्य इतिहासः



विश्व-कनिष्ठ-स्क्वाश-प्रतियोगितायाम् भारतस्य क्रीडिका अनाहत-सिंहः मिस्र देशस्य हबीबा-रिज्क इत्येतां एकादश सप्त, एकादश पंच षड् एकादश, एकादश- नव इत्यंकान्तरालेन पराभूय प्रागुपान्त्य-चक्रम् विजित्य उपान्त्य-चक्रम् प्राविशत् । विजयेनानेन अनाहत-सिंहः अस्मिन् विश्व-स्तरीय-द्वंद्वे अश्रान्तं द्वितीयवारम् उपान्त्य-चक्रं प्राप्य प्रथम भारतीय क्रीडिकात्वेन इतिहासम् अरचयत्। सम्प्रति सा खलु स्वर्ण-पदकस्य शीर्षक-विजयाय परिगणिता अस्ति।

# नीटप्रकरणे कोलाहलेन संसद्-कार्याचरणं सोमवासरं यावत् स्थगितम्



नीट्-प्रश्नपत्र-गोप्यताभङ्गे सहैव छात्राणां विरोध-प्रदर्शनमधिकृत्य अद्य पञ्चम-दिनेऽपि संसदि अविरत-कोलाहलेन उभयोः सदनयोः कार्याचरणं सोमवासरं यावत् स्थगितम् । अपराह्णे द्विवादने द्वितीय-स्थगनात् परं यदा राज्यसभा समवेता, तदा गृह-राज्यमन्त्रिणा नित्यानन्द-रॉयेन षड्विंशत्यधिकद्विसहस्रतमस्य राष्ट्रीय-गौरव-अपमान-निवारण-विधेयकम् उपस्थापितम्। एतत् विधेयकं एकसप्तत्यधिक-एकोनविंशतितमस्य अधिनियमस्य संशोधनार्थम् वर्तते । विधेयकस्य उपस्थापनात् परं विपक्षिणः नीट्-प्रकरणमादाय उच्चैः विरोधोद्घोषान् प्रारभन्त। एतस्य कोलाहलस्य मध्ये उपसभापतिः हरिवंशः सदनस्य कार्याचरणं सोमवासरं यावत् अस्थगयत्। इतः पूर्व प्रातः एकादशवादने यदा राज्यसभायाः कार्याचरणम् आरब्धं तदा सदनं कारगिल-युद्धस्य हुतात्मवीरेभ्यः श्रद्धाञ्जलिं प्रादात्। सभापतिः सी.पी. राधाकृष्णन् प्रावोचत् यत्, कारगिल-विजय-दिवसः नवनवत्यधिक एकोनविंशतितमस्य कारगिल-युद्धे भारतस्य विजयस्य स्मारकं वर्तते। उच्चसदने हुतात्मवीराणां स्मृतौ मौनमपि सन्धृतम्। अपरत्र नीट्-विषये छात्राणां प्रदर्शनं चाधिकृत्य विपक्षस्य विरोधेन लोकसभायाः कार्याचरणमपि सोमवासरं यावत् अपवारितम्। मध्याह्ने द्वादशवादने प्रथमस्थगनात् परं यदा सदनं समवेतम्, तदा संसदीय कार्यमन्त्री किरेन रिजिजुः न्यगादीत् यत् सर्वकारः प्रथम-दिनादेव नीट्-विषये चर्चायै सन्नद्धः । सः प्रावोचत् यत् कांग्रेस-दलेन नूतन-पक्षाश्रयानारोप्य चर्चायां विघ्नः उत्पाद्यते। मन्त्री गदितवान् यत् प्रधानमन्त्री नरेन्द्रमोदी देशम् आश्वस्तवान् यत् अस्मिन् विषये कठोरविधिः आनेष्यते। श्रीरिजिजुः विपक्षनेतारं राहुल-गान्धिनं न्यवेदयत् यत् सः स्व-संसदीय सहयोगिनां मार्गदर्शनं कुर्यात्, येन सदनस्य सञ्चालनं सुचारु रूपेण भवेत् । पीठासीनः अधिकारी जगदम्बिका पालः अवदत् यत् सर्वकारः चर्चायै प्रस्तुतः, विपक्षेण च सहयोगः विधातव्यः। अत्रापि अश्रान्त-कोलाहलेन सदनं सोमवार यावत् निवारितम् । इतः प्राक् प्रातः एकादशवादने यदा लोकसभायाः कार्माचरणम् आरब्धं, तदा सदने कारगिल-युद्ध सर्वोच्च-बलिदानं दत्तवद्भ्यः भारतीय सशस्त्र सेनायाः हुतात्मवीरेभ्यः श्रद्धाञ्जलिः अर्पितः तेषां स्मृतौ च मौनं चापि अवधारितम्

## सोनम वाङ्गचुकस्य षड्-विंशति-दिनात्मकं सुदीर्घम् अनशनं समाप्तम्



पर्यावरण-विदः सामाजिक कार्यकर्तुः च सोनम वाङ्गचुक इत्याख्यस्य षड्-विंशति-दिनात्मकं सुदीर्घम् अनशनं परह्यः रात्रौ गुरुग्रामस्य एकस्मिन् निज-चिकित्सालये विश्रान्तिमगात्। एतत् अनशनं जे. पी. नड्डा-जितेन्द्र सिंहयोः गरिमामय उपस्थितौ सम्पन्नम्। वाङ्गचुक-वर्येण निगदितं यत् बहुविधानां पक्षाश्रयाणाम् उपरि सुदीर्घ-विचार-विमर्शानन्तरमेव एषः निर्णयः गृहीतः

# लाहौल-क्षेत्रे प्रचलन्ति 'टैक्सी'-वाहने पतितः पर्वतः, नवजातेन सह १३ जनानां कारुणिका मृत्युः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य लाहौल-स्पीति-मण्डलस्य संसारी- किलाड़- तिन्दी-थिरोट मार्गे शुक्रवासरे अपराह्णे एकं टाटोसूमो 'टैक्सी' वाहनं प्रति पर्वतात् बृहती शिला पतिता। अस्मिन् वाहने उपविष्टाः सर्वे १३ जनाः वाहने एव निपीडिताः भूत्वा पञ्चत्वं गताः। कडूनाला-श्योर-क्षेत्रयोः मध्ये गोरना- स्थानस्य समीपे शुक्रवासरे अपराह्णे द्विवादनस्य निकटे एषा दुर्घटना अभवत्। टाटासूमो-वाहने सर्वे अपि जनाः कुल्लूक्षेत्रतः लाहौल-मार्गेण चम्बामण्डलस्य पाङ्गीक्षेत्रं गच्छन्तः आसन्। मार्गस्य अवरोधात् हेतोः गुरुवासरे ते तिन्दी-स्थाने स्थिताः आसन्। शुक्रवासरे यदा मार्गः पुनः सुचारुः अभवत् तदा वाहनं पाङ्गी-दिशि अग्रे सरितम्, परन्तु मार्गे एषा दुर्घटना संजाता। उल्लेखनीयम् अस्ति यत् वाहने उपविष्टः एकः जनः शिलापातात् भयात् दुर्घटनास्थलात् १०० मीटर-पूर्वमेव अवतीर्णाः आसीत्।

## चालकः यात्रिणः च असावधानाः एव आसन्, अवसरः अपि न प्राप्तः

आरक्षिभ्यः प्राप्तानुसारात् टाटा-सूमो-वाहने (HP-01M-2210) चालकेन सह १३ जनाः उपविष्टाः आसन्। शुक्रवासरे यथा एव यात्रिभिः पूर्णं वाहनं तिन्दी-क्षेत्रात् पाङ्गी-दिशि निर्गतं, तदा गोरना-स्थानस्य समीपे अकस्मात् पर्वतात् बह्व्यः शिलाः पतिताः सम्पूर्णं च वाहनं शिलानाम् अधः निमग्नम् अभवत्। दुर्घटना एतावती भीषणिका आसीत् यत् चालकः यात्रिणः च आत्मरक्षणस्य अवसरम् अपि न प्राप्नुवन्, क्षणमात्रे च वाहनं मलिनावशेष-राशौ निमग्नम् अभवत्। घटनायाः सूचनां प्राप्य सद्यः एव मण्डलप्रशासनं, आरक्षिमण्डलं, सीमा-मार्ग-सङ्गठनम् अन्ये च जनाः दुर्घटनास्थले प्राप्ताः युद्धस्तरे च आश्रय- उद्धार- कार्यम् आरब्धम्।

बी.आर.ओ. संस्थायाः यन्त्रैः मलिनावशेष-राशिं अपसार्य वाहनात् सर्वाणि शवानि बहिः निष्कासितानि। आहत्य १३ मृतेषु एका षट्मासीया बालिका अपि सम्मीलिता अस्ति। एतदतिरिच्य दुर्घटनायाम् सप्त पुरुषाः चतस्रः महिलाः च समाविष्टाः सन्ति। अस्मिन् माता-पुत्री, पिता-पुत्रः, पतिः, पत्नी च स्वप्राणान् अत्यजन्। अस्याः कारुणिक- दुर्घटनायाः परं सम्पूर्णे पाङ्गी- उदयपुरक्षेत्रे शोकस्य तरङ्गः अस्ति। लाहौल- स्पीति- मण्डलस्य आरक्षणाधीक्षकः शिवानीमेहला प्रोक्तवती यत् मार्ग-दुर्घटनायां षट्मासीय- बालिकया सह १३ जनानां मृत्युः अभवत्। आरक्षिभ्यः प्राथमिकीं पञ्जीकृत्य अन्वेषणम् आरब्धम्।

## मुख्यमंत्री सुक्खू महोदयेन दुर्घटनायां शोकः प्रकटितः, उपायुक्तेन सह दूरभाषे सम्भाषणम्

मुख्यमन्त्रिणा ठाकुर सुखविन्दरसिंहसुक्खुमहोदयेन लाहौल- स्पीति- मण्डलस्य कडूनालाक्षेत्रे अभूतपूर्वायां मार्गदुर्घटनायां १३ जनानां मृत्यौ गभीरः शोकः प्रकटितः। वाहने उपविष्टाः सर्वे यात्रिणः कुल्लूक्षेत्रतः पाङ्गीक्षेत्रं गच्छन्तः आसन्। मुख्यमन्त्रिणा लाहौल-स्पीति-मण्डलस्य उपायुक्तः सद्यः एव दुर्घटनास्थलं प्राप्य आश्रय- उद्धार- कार्याणां निरीक्षणं विधातुं निर्दिष्टः। तेन मृतानां परिवारेभ्यः सर्वसम्भाव्य-साहाय्यं व्रणितानां च कृते श्रेष्ठ-चिकित्सा-सुविधाः उपलब्धं कारयितुं अपि निर्देशाः दत्ताः। तेन व्रणितानां शीघ्र- स्वास्थ्य- लाभाय अपि प्रार्थना कृता। मुख्यमन्त्रिणा ईश्वरात् दिवङ्गतानाम् आत्मनां शान्तये शोकाकुलेभ्यः परिवारेभ्यः च एताम् असहनीयां क्षतिं सोढुं शक्तिं प्रदातुं याचना कृता।

## भरमौर-विधायकेन डॉ. जनकराजेन शोकः प्रकटितः

भरमौर-विधानसभा-क्षेत्रस्य विधायकेन डॉ. जनकराजेन पाङ्गी-उदयपुर-मार्गे संजातायां भीषणायां मार्गदुर्घटनायां महद् दुःखं प्रकटितम्। तेन कथितं यत् अस्याः कारुणिक-दुर्घटनया सम्पूर्णः प्रदेशः कम्पितः जातः। प्रारम्भिक- सूचनानुसारं भूस्खलने निमग्ने वाहने उपविष्टेषु १५ जनेषु १३ जनानां मृत्युः अभवत्, येषु षट्मासस्य एकः अबोधः शिशुः अपि सम्मीलितः अस्ति। तत्रैव, द्वयोः जनयोः सुरक्षिततत्वस्य सूचना आश्वासयन्ती अस्ति।डॉ. जनकराजेन दुर्घटनायां प्राणान् त्यक्तवद्भ्यः सर्वभ्यः जनेभ्यः श्रद्धांजलिं समर्प्य शोकसन्तप्तेभ्यः परिवारेभ्यः गभीरा संवेदना प्रकटीकृता। तेन ईश्वरात् दिवङ्गतात्मानां शान्तये परिजनेभ्यश्च एतत् असह्यं दुःखं सोढुं सामर्थ्यं प्रदातुं प्रार्थना कृता। तेन प्रोक्तं यत् दुर्घटनायाः सूचनां प्राप्य एव सः चम्बा- लाहौल- स्पीति- मण्डल- प्रशासनस्य वरिष्ठ- अधिकारिभिः सह निरन्तरं सम्पर्के अस्ति तथा च आश्रय-उद्धार-कार्याणां प्रतिक्षणं सूचनां गृह्णन् अस्ति। प्रभावितेभ्यः परिवारेभ्यः सर्वसम्भाव्यं साहाय्यं प्राप्नुयात्, अस्य कृते प्रशासनेन सह समन्वयः क्रियते। विधायकेन पार्वत्यक्षेत्रेषु निरन्तरं जायमानानां वृष्टीनां भूस्खलन-घटनानां च दृष्ट्या जनेभ्यः यात्रा-समये विशेषसावधानीं ग्रहीतुं निवेदितम्। तेन कथितं यत् ऋतोः मार्गस्य च स्थितिं ज्ञात्वा एव यात्रां कुर्वन्तु, प्रशासनेन प्रसारितानां दिशानिर्देशानां पूर्णतया पालनं कुर्वन्तु, येन एतादृशीभ्यः घटनाभ्यः रक्षितुं शक्येत।

# शिवा- आयुर्वेदिकमहाविद्यालयस्य ऋषिता ईशा च विश्वविद्यालयस्तरे द्वितीयं स्थानं प्राप्तवत्यः





**हिमसंस्कृतवार्ता मण्डी।** अमरुविश्वविद्यालयेन (नेरचौक,मण्डी,हि०प्र०) बी०ए०ऐम०ऐस० प्रथमवर्षस्य परीक्षापरिणामः उद्घोषितः। अत्रैव शिवा-आयुर्वेदिकमहाविद्यालयेन उत्तमः परिणामः प्राप्तः । महाविद्यालयस्य द्वे बालिके ( ऋषिता-ईशे ) विश्वविद्यालयस्तरे द्वितीयस्थानं गृहीतवत्यौ । महाविद्यालयस्य प्राचार्येण डॉ० राजेशसूदवर्येण सर्वेभ्यः छात्रेभ्यः शुभकामनाः प्रदत्ताः, तेषाम् उज्ज्वलभविष्यस्य कामना च कृता । परीक्षायां विशेषरूपेण छात्रैः संस्कृतविषये उत्कृष्टं प्रदर्शनं कृतम्। आहत्य षष्टिः छात्रा परीक्षां लिखितवन्तः,येषु पञ्चदश छात्राः तादृशाः ये कदापि जीवने संस्कृतं न पठितवन्तः। एषा महाविद्यालयपरिवारस्य कृते विशेषोपलब्धिरस्ति। मुख्यतया आयुर्वेदिकमहा-विद्यालयेषु प्रवेशकाले अभिभावकानां संस्कृतभाषामधिकृत्य चिन्ता भवति।यदस्माकं बालाः कथं संस्कृतं पठिष्यन्ति? यतो हि ये जीवने न कदापि संस्कृतं अधीतवन्तः, ते कथं आयुर्वेद- विषये पारङ्गताः भविष्यन्ति। तदा महाविद्यायपरिवारः सर्वदा एकमेव वाक्यम् उत्तरति! *चिन्ता नास्ति वयं भारतीयाः, 'संस्कृतं तु अस्माकं रक्ते अस्ति।।'

# आचार्यदेवेंद्रशर्मणः नेतृत्वे सिरमौर-उपशिक्षानिदेशकेन सह वार्ता सफला; शीघ्रं निर्गमिष्यन्ति आदेशाः



**सिरमौरम् (हिमाचलप्रदेशः):** हिमाचल-संस्कृतशिक्षकपरिषदः सिरमौर-मण्डलाध्यक्षेण आचार्यदेवेंद्रशर्मवर्येण सह एकेन प्रतिनिधिमण्डलेन सिरमौर-मण्डलस्य प्रारम्भिक-उपशिक्षानिदेशक-महोदयः सस्नेहं मिलितः। इयं भेटवार्ता पश्चात्ताति-नियमितीकरणस्य (Back-date regularization) चिरलम्बित-प्रकरणम् अधिकृत्य आयोजिता आसीत्।मण्डलाध्यक्षस्य आचार्यदेवेंद्रशर्मवर्यस्य अथकप्रयत्नैः, कुशलनेतृत्वेन च उपशिक्षानिदेशकेन सह कृता वार्ता अत्यन्तं साकारात्मक-परिणामदायिनी तथा च फलवती अभवत्। चर्चायां शिक्षकाणां पश्चात्ताति-नियमितीकरणस्य विषयान् गम्भीरतया उपस्थाप्य त्वरित-समाधानाय दृढं पक्षं रक्षितम्। प्रतिनिधिमण्डलस्य विचारान् सुचिरं श्रुत्वा उपशिक्षानिदेशक-महोदयेन पूर्णमाश्वासनं दत्तं यत् पश्चात्ताति-नियमितीकरणस्य आदेशाः शीघ्रातिशीघ्रं निर्गमिष्यन्ति। अनेन आश्वासनेन सिरमौरमण्डलस्य समस्त-संस्कृतशिक्षकवर्गेषु महती प्रसन्नता, उत्साहश्च व्याप्तः अस्ति।

# सरदार-पटेल-विश्वविद्यालय-मण्डी-नगरे 'दीक्षारम्भ-२०२६' कार्यक्रमस्य भव्यः शुभारम्भः








**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**
सरदार पटेल विश्वविद्यालये मण्डीनगरे शुक्रवासरे नवप्रवेशिछात्राणां कृते 'दीक्षारम्भ-२०२६' कार्यक्रमस्य शुभारम्भः विश्वविद्यालयस्य अमृतमहोत्सवसभागारे (स्वामी विवेकानन्दभवने) गरिमापूर्णवातावरणे आयोजितः। कार्यक्रमस्य मुख्यातिथिः मण्डीनगरस्य उपायुक्तः अपूर्वदेवगनवर्यः (आई.ए.एस.) आसीत्, यदा च कार्यक्रमस्य अध्यक्षता विश्वविद्यालयस्य कुलपतिः कार्यक्रमसंरक्षकश्च प्रो. ललितकुमार अवस्थी महोदयः अकरोत्। कार्यक्रमस्य शुभारम्भः मुख्यातिथिना मञ्चासीन-अतिथिभिः च दीपप्रज्वलनेन सरस्वतीवन्दनया च सह अभवत्। तदनन्तरं मुख्यातिथेः अध्यक्षस्य च शालया स्मृतिचिह्नेन च सम्मानं कृतम्। स्व-स्वागत- उद्बोधने छात्रकल्याण-अधिष्ठाता प्रो. राजेशकुमारशर्मा नवप्रवेशिछात्राणां स्वागतं कुर्वन् अवदत् यत् दीक्षारम्भ-कार्यक्रमस्य उद्देश्यं छात्रान् विश्वविद्यालयस्य शैक्षणिक-संस्कृत्या, अनुशासनेन, पाठ्यक्रमेण, अनुसन्धानेन, नवाचारेण, छात्र-कल्याण-योजनाभिः, विभिन्न- सह-पाठ्यचर्यागतिविधिभिश्च परिचितं कारयितुम् अस्ति। कुलपतिः प्रो. ललितकुमार अवस्थी स्व- अध्यक्षीय- सम्बोधने राष्ट्रियशिक्षानीतेः (२०२०) उद्देश्येषु प्रकाशं निक्षिपन् अवदत् यत् शिक्षायाः उद्देश्यं केवलं ज्ञानार्जनं नास्ति, अपितु छात्राणां समग्र-व्यक्तित्व-विकासः, अनुसन्धानं, नवाचारः, उद्यमिता, मानवीय-मूल्यानां संवर्धनं च अस्ति। सः छात्रान् आहूतवान् यत् ते विश्वविद्यालय-जीवनस्य सदुपयोगं कुर्वन्तः उत्कृष्टताम्, अनुशासनं, सामाजिक-प्रतिबद्धतां च स्व-जीवनस्य आधारं कुर्युः। अस्मिन् अवसरे कुलपतिः छात्रेभ्यः विश्वविद्यालय-नियमानां पालनाय, अनुशासनाय, व्यसनमुक्त्यै, रैगिंगतः दूरं स्थातुं, सामाजिक- सद्भावाय, राष्ट्रनिर्माणं च प्रति समर्पितं स्थातुं शपथम् अपि अकारयत्।मुख्यातिथिः अपूर्व देवगनवर्यः (आई.ए.एस.) स्व- प्रेरकसम्बोधने छात्रैः सह स्व-अनुभवान् संविभज्य अवदत् यत् अस्माभिः शिक्षया सह नैतिकमूल्यानाम्, अनुशासनस्य, सामाजिक- उत्तरदायित्वस्य, नेतृत्व-क्षमतायाश्च विकासे बलं दातव्यम्। सः यूनः नवाचारे, कौशलविकासे राष्ट्र-निर्माणे च सक्रिय-सहभागितां कर्तुम् आह्वानं कृतवान्।कार्यक्रमस्य अन्तराले वरिष्ठ-साहित्यकारेण डॉ. गङ्गाराम-राजी-महोदयेन रचितस्य 'रामप्यारी की सब्सिडी और अन्य कहानियाँ' इति कथा-सङ्ग्रहस्य लोकार्पणं कुलपतिना मञ्चासीन-अतिथिभिः च कृतम्। तदुपरान्तं लेखकः स्व-पुस्तकस्य समीक्षां रचनात्मक-दृष्ट्या तस्य सृजनस्य पृष्ठभूमौ च प्रकाशं निक्षिप्तवान्। सः अवदत् यत् सः स्वकीयम् एतत् पुस्तकं कुलपतये आचार्य-ललितकुमार अवस्थीमहोदयाय समर्पितवान् अस्ति। कुलसचिवः शशिपाल नेगी सर्वान् अतिथीन्, शिक्षकान्, अधिकारिणः, कर्मचारिणः छात्रान् च प्रति आभारं प्रकटितवान्। मञ्च-सञ्चालनं सह- छात्र-कल्याण- अधिष्ठाता डॉ. राकेशकुमारशर्मा अकरोत्। कार्यक्रमे अकादमिक-मामलानाम् अधिष्ठाता डॉ. पवनचन्दः, योजना- विकास-अधिष्ठाता डॉ. लखवीरसिंहः, डॉ. नीलमठाकुरः, डॉ. चेतनचौहानः, डॉ. गङ्गारामराजी, मुरारीशर्मा, कृष्णमहादेविया, रत्नलालः, सुरेन्द्रमिश्रः, अनिलशर्मा, विनोदबहलः एतैः सह आचार्याः गैरशिक्षकाः छात्राश्च उपस्थिताः आसन्।

# बुखारेस्ट-विश्वविद्यालयेन राष्ट्रपति-द्रौपदी-मुर्मू-वर्यायै विद्यावारिधिः (Doctorate) इत्याख्या मानद-उपाधिः प्रदत्ता

बुखारेस्ट (रोमानिया):रोमानियादेशस्य 'बुखारेस्ट यूनिवर्सिटी ऑफ इकोनॉमिक स्टडीज' इति विश्वविद्यालयेन अद्य भारतस्य राष्ट्रपति-श्रीमती-द्रौपदी-मुर्मू-वर्यायै तस्याः विशिष्टायै सार्वजनिकसेवाग his/her, शिक्षायै, सामाजिक-समावेशाय च प्रतिबद्धतायै तथा च भारत-रोमानिया-सम्बन्धान् सुदृढीकर्तुं तस्याः योगदानार्थं 'विद्यावारिधिः' (मानद-डॉक्टरेट्) इति उपाधिना सम्मानः कृतः। राष्ट्रपतिवर्या एतं सम्मानं स्वीकारोति सती, एतम् भारतस्य १४० कोटि (१.४ अरब) जनानां कृते समर्पितवती, उक्तवती च यत् एतत् द्वयोः देशयोः जनानां मध्ये अटूट-मित्रतां दर्शयति।राष्ट्रपति-मुर्मू-वर्या शिक्षां स्वजीवनस्य सर्वाधिकं परिवर्तनकारिणीं शक्तिम् अकथयत्। स्वग्रामस्य प्रथमा बालिका भूत्वा महाविद्यालयं गन्तुं आरभ्य भारतस्य राष्ट्रपति-पद-प्राप्ति-पर्यन्तं स्वस्य यात्रां संस्मृत्य सा अवदत् यत् - "शिक्षा एव सर्वानुकूलः (समानता-आनयनस्य) कारकः तथा च एकस्य न्यायपूर्णस्य, समावेशिनः च समाजस्य सुदृढतमः आधारः अस्ति।" सा एतस्मिन् विषये अपि बलं दत्तवती यत् कृत्रिम-बुद्धिमत्तायाः (AI) तथा च तीव्र-प्राविधिक-परिवर्तनस्य एतस्मिन् युगे विश्वविद्यालयानाम् एषा महती जिम्मेदारी अस्ति यत् ते सुनिश्चितं कुर्युः यत् ज्ञानस्य मार्गदर्शनं विवेकः, नीतिः, करुणा च कुर्युः।

# मुख्यमन्त्रिणा सुक्खू-महोदयेन 'थीमैटिक-गार्डन'-परियोजनायाः शुभारम्भः कृतः, ४ कोटिरूप्यकाणां राशिः अपि प्रसारिता



हिमसंस्कृतवार्ताः — काङ्गड़ा ।मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन काङ्गड़ामण्डलस्य देहरास्थे 'दुर्गेश-अरण्य-अंतरराष्ट्रीय-प्राणी-उद्याने' विकसिष्यमाणायाः महत्त्वाकाङ्क्षिण्याः 'थीमैटिक-गार्डन'-परियोजनायाः (Thematic Garden Project) शुभारम्भः कृतः। तत्रैव परियोजनायाः कार्यान्वयनाय 'हिमाचल-प्रदेश-राज्य-जैव-विविधता-बोर्ड' इत्यस्य माध्यमेन मुख्य-वन्यजीव-संरक्षकाय, हिमाचलप्रदेशाय ४ कोटिरूप्यकाणां (4 Crore) राशिः अपि प्रसारिता। मुख्यमन्त्रिणा प्रतिपादितं यत् इयं परियोजना हिमाचलस्य समृद्ध-जैव-विविधतायाः संरक्षणेन सह पर्यावरण-शिक्षां, वैज्ञानिक-अनुसन्धानं, पारिस्थितिक-पर्यटनम् ('ईको-टूरिज्म') च प्रोत्साहयितुं राज्यसर्वकारस्य कटिबद्धतां दर्शयति।

एतत् 'थीमैटिक-गार्डन' प्रायः २२,२४७ वर्गमीटर-क्षेत्रे विकसितं करिष्यते आगन्तुक्यश्च प्रदेशस्य विविधानाम् वनस्पतीनां प्राकृतिक-धरोहराणान जीवन्तं समृद्धं च अनुभवं प्रदास्यति। तेन उक्तं यत् अस्याः परियोजनायाः अन्तर्गतं 'फिकेरियम' (Ficarium) विकसितं करिष्यते, यस्मिन् 'फैकस' (Ficus) इत्यस्य विविधानां प्रजातीनां प्रदर्शनं विधास्यते तासां च पारिस्थितिकीयं संरक्षण-सम्बन्धी च महत्त्वं रेखाङ्कितं करिष्यते। एतदतिरिच्य, 'आर्बोरेटम' (Arboretum) मध्ये देशियानां वैदेशिकीनां च प्रजातीनां वृक्षाणां सङ्ग्रहः करिष्यते, यत् पर्यावरण-संरक्षणं, शिक्षां, वैज्ञानिक-अध्ययनं चोत्साहयिष्यति। परियोजनायाः अन्तर्गत एकः दृष्टि-स्तम्भः ('वॉच-टावर') अपि निर्मास्यते, यतः परितः स्थितानाम् प्राकृतिकानां दृश्यानां अवलोकनं विधातुं शक्ष्यते। एतदतिरिच्य, 'बैंबूसेटम' (Bambusetum) मध्ये विविधानां वेणु-प्रजातीनां (बांस) प्रदर्शनं कृत्वा तासां पारिस्थितिकीयाम् आर्थिकीयं च उपयोगितां सतत-विकासे च तासां भूमिकां सूचयिष्यते। मुख्यमन्त्रिणा प्रोक्तं यत् राज्यसर्वकारः हिमाचलस्य समृद्ध-जैव-विविधतायाः संरक्षणं कृत्वा प्रदेशे सतत-विकासं प्रोत्साहयति। तेन कथितं यत् एतत् 'थीमैटिक-गार्डन' संरक्षण-जागरूकतायाः, पर्यावरण-संरक्षणस्य, अनुभवात्मक-शिक्षणस्य, वैज्ञानिक-अनुसन्धानस्य च एकं महत्त्वपूर्णं केन्द्रं भूत्वा उद्भविष्यति। साकमेव एतत् प्रकृति-आधारित-पर्यटनस्य वर्धने अपि महती भूमिकां निर्वक्ष्यति। तेन उक्तं यत् अस्याः परियोजनायाः छात्रेभ्यः, शोधकर्तृभ्यः, पर्यटकेभ्यः, प्रकृतिप्रेमिभ्यश्च प्रदेशस्य समृद्ध-जैव-विविधतां अवगन्तुम् एकः उत्कृष्टः मञ्चः प्राप्स्यते। मुख्यमन्त्रिणा राज्य-जैव-विविधता-बोर्डस्य वनविभागस्य च अस्याः महत्त्वाकाङ्क्षि-परियोजनायाः परिकल्पनायै सज्जीकरणानां च कृते तेषां प्रयासानां प्रशंसा कृता। तेन विश्वासः प्रकटितः यत् परियोजनायाः पूर्त्यां सत्याम् अत्र आगच्छद्भ्यः पर्यटकेभ्यः यात्रायाः अनुपमः अनुभवः प्राप्स्यति तथा च इयं परियोजना देशे जैव-विविधता-संरक्षणस्य 'ईको-टूरिज्म' इत्यस्य च एकम् आदर्शं केन्द्रं भूत्वा उद्भविष्यति। तेन प्रोक्तं यत् अस्याः परियोजनायाः कार्यान्वयनम् मुख्य-वन्यजीव-संरक्षकेन, हिमाचलप्रदेशेन विधास्यते, यदा च 'हिमाचल-प्रदेश-राज्य-जैव-विविधता-बोर्ड' तान्त्रिक-मार्गदर्शनं सहयोगं च प्रदास्यति।

# हिमाचले अलभ्यं दृश्यम्, किन्नौर-क्षेत्रे ३४०० मीटर-उच्चतायां प्रथमवारं दृष्टः पीत-पादः हरित-कपोतः



हिमसंस्कृतवार्ताः — शिमला ।किन्नौर-मण्डलस्य रक्छम्-छितकुल्-वन्यजीव-अभयारण्ये प्रथमवारं पीत-पादः हरित-कपोतः (Yellow-Footed Green Pigeon) दृष्टः अस्ति। एषः अलभ्यः पक्षी प्रायः ३,४०० मीटर-उच्चतायां अभिलिखितः, यः हिमाचले अस्याः प्रजातेः अधुना यावत् उच्चतमः आधिकारिकः अभिलेखः परिगण्यते।

अनेन सह एव एषा किन्नौर-मण्डले अस्याः प्रजातेः प्रथमा पुष्टा उपस्थितिः अपि अस्ति। अस्य अलभ्य-पक्षिणः अवलोकनं प्रलेखीकरणं च खण्ड-वनाधिकारी सन्तोषकुमारठाकुरः वनमित्रा अल्पनानेगी च रक्छम्-क्षेत्रे अकुरुताम्। एषः अभिलेखः सत्यापनाय राज्यस्य पक्षिविशेषज्ञेभ्यः पक्षिविज्ञान-समुदायाय च प्रेषितः अस्ति। विशेषज्ञानाम् अनुसारं पीत-पादः हरित-कपोतः सामान्यतः समतल-क्षेत्रेषु, पर्वतानां उपत्यकासु (तलहटी), वाटिकासु तथा च प्रायः २,४०० मीटर-उच्चता-यावत् स्थितेषु वनेषु प्राप्यते। एषा प्रजातिः प्रायः हिमालयस्य अति-उच्चेभ्यः शीतेभ्यः च क्षेत्रेभ्यः दूरे एव तिष्ठति। एतादृश्याम् अवस्थायां बास्पा-उपत्यकायाः समीपे ३,४०० मीटर-उच्चतायाम् अस्य प्राप्तिः अतीव असाधारणा वैज्ञानिक-दृष्ट्या च महत्त्वपूर्णा मन्यते।

हिमाचलस्य प्रकृतिविद् हिमांशुचौधरी महोदयः ज्ञापितवान् यत् प्रदेशे अस्याः प्रजातेः एषः उच्चतमः अभिलेखः परिगण्यते। तेन २०२० तमे वर्षे लद्दाख-क्षेत्रस्य माथो-ग्रामे प्रायः ३,५०० मीटर-उच्चतायाम् अभिलिखितस्य एकस्य दुर्लभ-अभिलेखस्य अपि उल्लेखः कृतः, यः 'ई-बर्ड' (eBird) मञ्चे पञ्जीकृतः अस्ति। विशेषज्ञानां मतम् अस्ति यत् एतादृशाः अभिलेखाः पार्वत्य-क्षेत्रेषु पक्षिणां आवासेषु जायमानानां परिवर्तनानां सङ्केतं कर्तुं शक्नुवन्ति।

यद्यपि, तेन स्पष्टीकृतं यत् एतत् जलवायु-परिवर्तनस्य स्थायी-विस्तारस्य वा प्रमाणं मन्तुं पूर्वं सुदीर्घकालं यावत् वैज्ञानिकी निरीक्षणं अध्ययनं च आवश्यकं भविष्यति। सराहन-वन्यजीव-प्रभागस्य उप-वन-संरक्षकः (DCF) अशोकनेगी अवदत् यत् किन्नौरस्य जैव-विविधता अतीव समृद्धा अस्ति क्षेत्रे च नियोजितानां वनाधिकारिणां सक्रिय-निरीक्षणस्य कारणेन निरन्तरं नूतनानां पक्षि-प्रजातीनां प्रलेखीकरणं भवति।

किन्नौरस्य उपायुक्तः डॉ. अमितकुमारशर्मा वन्यजीव-विभागस्य दलाय वर्धापनानि (बधाई) वितीर्य विश्वासं प्राकटयत् यत् भविष्ये अपि किन्नौरस्य पक्षि-विविधतायाः सम्बद्धाः एतादृशाः महत्त्वपूर्ण-अभिलेखाः सम्मुखम् आगमिष्यन्ति।

# वित्तीय-परिष्काराणां दिशि महत् पदम्, सर्वेषां सर्वकारीय-मण्डलानां निगमानां च कृते निर्मास्यते एका 'वित्त' कम्पनी

## 'हिमाचल प्रदेश स्टेट फायनांस कारपोरेशन' इति संस्थायै मन्त्रिमण्डलस्य स्वीकृतिः

हिमसंस्कृतवार्ताः- शिमला। वित्तीय-परिष्काराणां दिशि अन्यद् एकं पदं वर्धयन् हिमाचलसर्वकारेण सार्वजनिक-उपक्रमाणां कृते एकां नूतनां वित्त-कम्पनीं निर्मातुं निर्णयः गृहीतः। अस्याः कम्पनी-संस्थायाः नाम 'हिमाचलप्रदेश- राज्यवित्तनिगमः भविष्यति। एषा एका 'नॉन बैंकिंग फायनांस कंपनी' भविष्यति, यस्याः कृते 'रिजर्व बैंक ऑफ इंडिया' पक्षतः अनुमतिपत्रं (लाइसेंस) ग्रहीष्यते। एषा राज्यसर्वकारस्य मण्डलानां निगमानां च वित्तीय-प्रबन्धनं द्रक्ष्यति। दिनद्वयात् पूर्वं विहितायां मन्त्रिमण्डलस्य उपवेशने एतस्यै स्वीकृतिः प्रत्ता। अधुना वित्तविभागः अस्याः कम्पनी-संस्थायाः संघटनाय अग्रेतनां प्रक्रियां पूरयिष्यति। हिमाचलसर्वकारे आहत्य २३ सार्वजनिक-उपक्रमाः सन्ति। एतेषु १३ बृहत्-उपक्रमाः हानौ चलन्तः सन्ति, यदा च १० उपक्रमाः अधुना लाभस्य स्थितौ सन्ति। एतेषु कर्मचारिणां सङ्ख्या अपि प्रायः ३०,००० परिमिता अस्ति। हानि-युक्तेषु द्वाभ्यां बृहत्-उपक्रमाभ्यां राज्य-विद्युत्-मण्डलम् एच.आर.टी.सी. च समाविष्टे स्तः। अवशिष्टेषु सार्वजनिक-उपक्रमेषु हानिः एताभ्यां न्यूना अस्ति। एते सर्वकारीय- उपक्रमाः स्वकीय-धनं पृथक्-पृथक् वित्तकोषेषु रक्षन्ति। एतेषु केचन निजी-वित्तकोषाः अपि सन्ति। नूतनायाः 'फायनांस'-कम्पन्याः निर्माणात् परं सा एव सर्वं वित्तीय-प्रबन्धनं द्रक्ष्यति। यद्यपि धनस्य उपयोगाय एतेषु मण्डल-निगमेषु कापि प्रतिबन्धः न भविष्यति, परन्तु एकस्याः 'फायनांस' कम्पन्याः 'कॉर्पस-फण्ड' एकत्र स्थाने स्थितत्वात् राज्यसर्वकारस्य कृते वित्तीय-आकलनं सुगमं स्थास्यति। अस्य 'कॉर्पस-फण्ड' इत्यस्य उपयोगः स्वकीयां वित्तीयक्षमतां ₹ वर्धयितुम् अपि विधातुं शक्ष्यिष्यते। एषा कम्पनी एकप्रकारेण 'नॉन बैंकिंग' वित्तीयकार्याणि द्रक्ष्यति। 'नॉन-बैंकिंग फायनांशियल कंपनी' रूपेण वित्तीय- गतिविधि- सञ्चालनाय 'भारतीय रिजर्व बैंक' संस्थातः पञ्जीकरणम् अनुमतिपत्रं (लाइसेंस) च ग्रहणम् अनिवार्यम् अस्ति। एन.बी.एफ.सी. वित्तकोषः न भवति, परन्तु ऋण-वितरणं, वाहन- उपकरण- वित्तीयनं, 'माइक्रो फायनांस', 'गोल्ड लोन', 'बिजनेस लोन', 'लीजिंग' अन्याः च वित्तीय-सेवाः प्रदातुं शक्नोति। आर.बी.आई. नियमानुकूलम्, कापि कम्पनी वैध-पञ्जीकरण-प्रमाणपत्रस्य विना एन.बी.एफ.सी. रूपेण कार्यं विधातुं न शक्नोति। अस्य कृते सर्वप्रथमं कम्पनी-अधिनियम-२०१३ इत्यस्य अन्तर्गतं कम्पनी-संस्थायाः सङ्घटनम् करणीयं भवति, यस्मात् परं आर.बी.आई. संस्थातः अनुमतिपत्रं प्राप्तुम् आवश्यकं वर्तते। इयं प्रक्रिया अधुना पूरणीया अस्ति।

# मुख्यमंत्रिणा धामिना जनसमस्यानां त्वरिताय समयबद्धसमाधानाय दत्तः निर्देशः



**हिमसंस्कृतवार्ता, देहरादूनम्, धीरजः 24 जुलाईमासः** ।मुख्यमन्त्री पुष्करसिंहधामी शुक्रवासरे मुख्यमन्त्रीशिविरकार्यालयस्थिते मुख्यसेवकसदने प्रदेशस्य विविधक्षेत्रेभ्यः समागतानां नागरिकाणां समस्याः अशृणोत्। तेन अधिकारिभ्यः निर्देशाः प्रदत्ताः यत् प्रत्येकजनपरिवादस्य समाधानं संवेदनशीलतया, पारदर्शितया, समयबद्धतया च सुनिश्चितं क्रियताम्, येन जनाः अनावश्यकरूपेण कार्यालयानां पुनःपुनः परिभ्रमणं न कुर्वन्तु।मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः जनहितस्य सुशासनस्य च सिद्धान्तान् अनुसृत्य कार्यं करोति तथा जनसामान्यस्य समस्याणां त्वरितनिराकरणं सर्वकारस्य सर्वोच्चप्राथमिकतासु अन्यतमम् अस्ति। तेन अधिकारिणः निर्देशिताः यत् प्रत्येकशिकायतायाः गम्भीरतया परीक्षणं कृत्वा नियमानुसारम् प्रभाविकार्यवाही क्रियताम् तथा परिवादसूचयित्रे समाधानस्य प्रगतिविषये नियमितरूपेण सूचना प्रदीयताम्।सः अवदत् यत् प्रदेशवासिनाम् अपेक्षाणां परिपालनं सर्वकारस्य दायित्वम् अस्ति। सर्वे अधिकारिणः जनसेवाभावेन कार्यं कुर्वन्तु तथा जनपरिवादानां निराकरणे कस्याप्यनावश्यकविलम्बस्य अवसरः न प्रदीयताम्।मुख्यमन्त्री अस्मिन् अवसरे गढवालमण्डलस्य आयुक्तम् आनन्दस्वरूपम् तथा गढवालपरिक्षेत्रस्य महानिरीक्षकं राजीवस्वरूपं प्राप्तानां जनसमस्यानां प्राथमिकताक्रमेण समाधानं सुनिश्चेतुं निर्देशितवान्। तेन उक्तं यत् येषां प्रकरणानां निराकरणं जनपदस्तरे विभागीयस्तरे वा सम्भवति, तानि तत्क्षणमेव समाधीयन्ताम्, उच्चस्तरीयप्रकरणानि तु शीघ्रं सम्बन्धितविभागेभ्यः प्रेष्यन्ताम्।मुख्यमन्त्री अधिकारिभ्यः जनश्रवणव्यवस्थां अधिकप्रभाविनीं परिणामोन्मुखिनीञ्च कर्तुम् अपि बलम् अददात्, येन प्रदेशस्य प्रत्येकं नागरिकः समये न्यायं रक्षणं च प्राप्नुयात्।

# महामण्डलेश्वर-यति-मातुः प्रत्यङ्गिरा-गिरी इत्येतस्याः सम्मानार्थं साधूनां आशीर्वाद-समारोहः



**हिमसंस्कृतवार्ता हरिद्वारम्, धीरजः २४ जुलाई।** अखिलभारतीय-अखाडा-परिषदः राष्ट्रियाध्यक्षः श्रीमहन्त-रविन्द्रपुरी-महाराजः तथा राष्ट्रियमहामन्त्रिणः श्रीमहन्त-स्वामी-हरिगिरि-महाराजस्य उपस्थितौ शुक्रवासरे आनन्दभैरव-मन्दिरे नवनियुक्तायाः महामण्डलेश्वर-यति-मातुः प्रत्यङ्गिरा-गिरी इत्यस्याः सम्मान-आशीर्वाद-समारोहः आयोजितः।कार्यक्रमे श्रीमहन्त-स्वामी-हरिगिरि-महाराजः अवदत् यत् महामण्डलेश्वरः यति-नरसिंहानन्द-गिरिः सनातनधर्मस्य रक्षणाय कार्यं करोति, तथा परिषद् तस्य प्रयत्नान् प्रति स्वस्य सहयोगं समर्थनञ्च आश्वासितवती। तेन उक्तं यत् अस्यैव क्रमस्य अन्तर्गतं तस्य शिष्या यति-माता प्रत्यङ्गिरा-गिरिः महामण्डलेश्वर-पदे नियुक्ता, तस्यै अपि सर्वथा सहयोगः प्रदातुं संकल्पः कृतः।राष्ट्रियाध्यक्षः श्रीमहन्त-रविन्द्रपुरी-महाराजः अवदत् यत् वर्तमानकाले सनातनधर्मस्य सन्तसमाजस्य च समक्षे विविधाः समस्याः सन्ति। तेषां मते ये एतासां समस्यानां सम्मुखिनं कर्तुं प्रयतन्ते, ते संरक्षणस्य, सहयोगस्य समर्थनस्य च पात्राणि भवन्ति। सः उक्तवान् यत् परिषद् पूर्ववत् अग्रेऽपि यति-नरसिंहानन्द-गिरिं तथा यति-मातुः प्रत्यङ्गिरा-गिरिं प्रति स्वसहयोगं अविच्छिन्नं स्थापयिष्यति। स्वसम्बोधने महामण्डलेश्वर-यति-माता प्रत्यङ्गिरा-गिरिः अवदत् यत् सा स्वगुरोः यति-नरसिंहानन्द-गिरिणो विचारेषु उद्देश्येषु च पूर्णतया समर्पिता अस्ति तथा आजीवनं तया प्रदर्शितमार्गे कार्यं कर्तुं प्रयतिष्यते। कार्यक्रमस्य अन्ते महामण्डलेश्वरः यति-नरसिंहानन्द-गिरिः महाराजः तथा महामण्डलेश्वर-यति-माता प्रत्यङ्गिरा-गिरिश्च उपस्थितेभ्यः साधुभ्यः कृतज्ञतां प्रकट्य सर्वेभ्यः धन्यताविष्करणम् अकुरुताम्

# शिक्षाक्षेत्रे अनुपमं निदर्शनम्: परीक्षायाः अन्तिमदिने एव कुमारभास्करवर्मासंस्कृत-पुरातनाध्ययनविश्वविद्यालये न परीक्षाफलं घोषितम्



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः।** छात्राणां शैक्षणिकभविष्यस्य सुरक्षितीकरणाय नलबाडीस्थितः कुमारभास्करवर्मासंस्कृतपुरातन-अध्ययनविश्वविद्यालयः एकं युगान्तकारिणं समयोचितं च पदक्षेपं स्वीकृत्य अनन्यं निदर्शनं प्रस्तुतवान्। शिक्षासुधारस्य अभिनवप्रयासरूपेण विश्वविद्यालयप्रशासनेन अद्य विधि-पारङ्गत (LL.M.) प्रथमसत्रपरीक्षायाः अन्तिमप्रश्नपत्रस्य समाप्तेः केवलं चतसृषु (४) होरासु (घण्टासु) एव परीक्षाफलं घोषितम्। अस्मिन् वर्षे जनवरीमासे विश्वविद्यालयेन विधिशास्त्रे नूतनः स्नातकोत्तरपाठ्यक्रमः आरब्धः। एतस्याः उपलब्धेः विषये परीक्षानियन्त्रकः डॉ. प्रशान्तज्योतिगौतममहोदयः उक्तवान् यत्, परीक्षाफलस्य प्रतीक्षायां परीक्षार्थिनां यः बहुमूल्यः समयः प्रायशः नष्टः भवति, तस्य रक्षणार्थमेव एषा विशिष्टा व्यवस्था कृता। सः अवदत् यत् आधुनिक-अङ्कीय-प्रविधेः (Digital Technology) मानवीयप्रयत्नस्य च सुदृढसमन्वयेन एतादृशे न्यूनतमे समये परीक्षाफलं प्रकाशयितुं शक्यम् अभवत्। अपि च सूचितं यत् परीक्षार्थिनः विश्वविद्यालयस्य जालपुटे (Website) निश्चित-सङ्केत-माध्यमेन (Link) स्वकीयाम् अङ्कतालिकां (Score Card) प्राप्तुं (Download) शक्नुवन्ति। तदतिरिक्तं, छात्राणां सौकर्यार्थं विश्वविद्यालयेन उत्तरपुस्तिकानां पुनर्मूल्याङ्कनाय (Re-evaluation) अपि अन्तर्जालमाध्यमेन आवेदनस्य व्यवस्था कृता अस्ति। पुनर्मूल्याङ्कनार्थं अन्तर्जाल-आवेदनस्य अन्तिमा तिथिः ४ अगस्त, २०२६ इति निर्दिष्टा अस्ति। उल्लेखनीयम् अस्ति यत् कुलपतेः आचार्य-प्रह्लाद-रा-जोशी-महोदयस्य दूरदर्शिनि नेतृत्वे राष्ट्रिय-शिक्षा-नीतिः २०२० (NEP 2020) इत्यस्याः प्रभावी-कार्यान्वयनाय विश्वविद्यालयः निष्ठापूर्वकं प्रगत्या प्रसरति। विश्वविद्यालयस्य सूत्रानुसारं शैक्षणिकव्यवस्थायां पारदर्शिता, क्षिप्रता, आधुनिकता च समाविष्टा, येन कारणेन पारम्परिक-समयात् बहुपूर्वमेव परीक्षाफलं घोषितुं समर्थाः अभवन्। विश्वविद्यालयस्य एतादृशः प्रशंसनीयः उपक्रमः छात्रसमुदायस्य कृते विशेषतः लाभदायकः भविष्यति इति आशास्यते।



**बुखारेस्ट-विश्वविद्यालये राष्ट्रपति-द्रौपदी-मुर्मू- विद्यावारिधिः (Doctorate) इत्याख्या मानद-उपाधिः प्राप्नोति**

# ।।आषाढी एकादशी।।

महाराष्ट्रस्य एका प्रमुखा देवता। वजन्ती सम्प्रदायस्य उपास्य देवता। विठ्ठलं विष्णु अवतारं कृष्णावतारं वा कथ्यते। महाराष्ट्रे कर्नाटकेदेशे च प्राचीनकालात् विठ्ठलस्य पूजा क्रियते। विष्णुसम्बद्धः एकादशीव्रतोऽपि विठ्ठलस्य तीर्थयात्रिणः भक्त्या आचर्यते। विष्णुप्रिया तुलसी विठ्ठलस्यापि अतीवः प्रियः। तुलसीकाष्ठमणिमाला विठ्ठलस्य अपि परिचयचिह्नम् अस्ति। विष्णुहृदये श्रीवत्सलांछनस्य चिह्नं विठ्ठलस्य हृदये अपि दृश्यते। गोपालकाला भगवान् श्रीकृष्णस्य प्रमुखं नैवेद्यम् अस्ति। विठ्ठलयात्रा अपि गोपालकालाया सेवनेन समाप्तं भवति। कृष्णविठ्ठलयोः संयोगः सुप्रसिद्धः। संत ज्ञानेश्वरस्य मतानुसार भगवान् श्रीहरिः स्वयं विठ्ठलरूपेण आगत्य स्वसुदर्शनचक्रेण पंढरपूरनगरस्य स्थापनां कृतवान्। पंढरपुरक्षेत्रे स्थितः विठ्ठलः अष्टाविंशति युगेभ्यः इष्टिका उपरि स्थितः अस्ति। इति अनेकेषां साधवः मतम्/ प्रत्ययः अस्ति। परन्तु कालगणनां कर्तुं न कोऽपि समर्थः। साधूनां वचनं केवलम् अज्ञातप्राचीनतां सूचयति।

विठ्ठल शब्दस्य व्युत्पत्ति-
विठ्ठलशब्दरूपः विष्ठलशब्दात् निर्मितः। विष्ठल इत्यर्थः दूरस्थे वने निवसन्। अस्य अर्थः विठ्ठलदेव इत्यर्थः वने निवसतः देवः। एकस्य सिद्धान्तस्य अनुसारं वि इत्यस्य अर्थः ज्ञानं वा प्रज्ञा वा, ठोबा इत्यस्य अर्थः मूर्तिः इति। विठोबा ज्ञानमूर्तिरित्यर्थः। विठ्ठलं पाण्डुरङ्गं अपि कथ्यते। प्रत्येकं साधुभिः विठ्ठलस्य वर्णनं भिन्नं- भिन्नं कृतम् अस्ति। यद्यपि ते विठ्ठलं चर्मचक्षुषा न दृष्टवन्तः तथापि ज्ञानचक्षुषा तं दृष्ट्वा वर्णितवन्तः। विठ्ठल भक्त्याः इतिहासः तीर्थयात्री सम्प्रदायस्य उदयः विकास्य इतिहासः च। आषाढमासे प्रतिवर्षं लक्षशःभक्ताः पादचरेण शिबिका वहन्ति। सर्वाणि क्लेशं, तृष्णां, क्षुधां च विस्मृत्य भक्ताः बहुवर्षेभ्यः शिबिकां वहन्ति। आषाढी एकादशी देवशयनी एकादशी इति नाम्ना अपि प्रसिद्धा अस्ति। एषा एकादशी सम्पूर्णे भारते भक्त्या आचर्यते। विठ्ठ नाम्नः गर्जना/ उद्घोषं तीर्थयात्रिणः कुर्वन्ति। जय-जय विठ्ठलऽऽ श्रीहरि विठ्ठलऽऽ एतादृशः शब्दः सर्वत्र श्रूयते।
श्रीविठ्ठलाय नमः 🙏🙏

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम् ®©**

# लौकिकन्यायकोशः

## कूपयन्त्रघटीन्यायः

कूपात् जलम् उद्धर्तुम् उपयुज्यमानं कूपयन्त्रं घटीभिः सहितं भवति। यदा चक्रं भ्रमति तदा एका घटी जलेन पूर्णा भूत्वा उपरि आगच्छति अपरा च घटी जले मग्ना भवति। पुनः घटी रिक्ता भूत्वा पुनः जले मग्ना भवति। अनया रीत्या अधस्तनाः घटाः उपरि आगच्छन्ति उपरितनाश्च अधोगच्छन्ति।
तथैव- अस्माकं जीवने कानिचन दिनानि अनुकूलानि भवन्ति कानिचन च प्रतिकूलानि। एवं जीवनस्य रीतिं कथयितुम् अस्य न्यायस्य प्रयोगः क्रियते। यथा-

**"कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं,
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान्।
अन्योन्यं प्रतिपक्षसन्ततिमिमां लोकस्थितिं बोधयन्,
क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः।।"**
**(मृच्छकटिके १०- ५९)**

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ता
✍ असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ६१

*************

अस्मिन् लेखे असमराज्यस्य 'काशीधाम' इति नामधेया अन्यतमा धर्मोपेता विश्वनाथजिला वर्तते, अस्याः जिलायाः गतिविधिविषये, अथवा सामान्यः परिचयः अत्र प्रस्तोतुं प्रयत्यते।

**१) प्राथमिकः परिचयः**
राज्यम्- असमः,
मुख्यालयः- विश्वनाथ-चारिआली,
प्रतिष्ठा- २०१५-तमवर्षस्य१५-अगस्तदिनाङ्के शोणितपुरजिलातः पृथग्भूता अस्ति।
क्षेत्रपरिमाणः- १४१५-वर्गकि०मि०मितः।
जनसङ्ख्या- २०११-तमवर्षीयं जनगणनानुसारं ६,१२,४९१ मिता।

**२) भौगोलिकस्थितिः-**
मण्डलः- "नार्थ-असम-डिवीजन" इति ।
सीमा- अस्याः जिलायाः उत्तरदिशि अरुणाचलप्रदेशः अवस्थितः, दक्षिणदिशि महाबाहुः ब्रह्मपुत्रनदः, पूर्वदिशि लखीमपुरजिला, पश्चिमदिशि शोणितपुरजिला च।
नद्यः- ब्रह्मपुत्रः, बुरोई, बुडीगाङ्ग, घिलाधारी इत्यादिनद्यः अस्याः जिलायाः वक्षःस्थलतः प्रवाहमाणाः सन्ति।

**३) प्रशासनिकक्षेत्रम्-**
राजस्व-मण्डलः- विश्वनाथः, गहपुरं, विश्वनाथघाटः, हेलेमः चेति।
विधान-सभासनम्- विश्वनाथः, बेहेरी चेति द्वयम् ।
लोकसभा- तेजपुरसंसदीयक्षेत्रम् ।

**४) जनता, संस्कृतिः च-**
मुख्यसमुदायाः- आहोमः, सोनोवाल-कछारी, बङ्गाली, नेपाली, मिरी इत्यादि ।
मुख्यभाषा- असमीया, हिन्दी इत्यादि ।



**प्रमुखोत्सवाः-** बिहुः, दुर्गापूजा, दीपावलिः इत्यादि।
मुख्यवृत्तिः- शिक्षा, कृषिः, चायोत्पादनम्, सामान्यं वाणिज्यम् इत्यादि ।
प्रसिद्धस्थानम्- विश्वनाथघाट इति स्थानं प्राक्तनं वनारसक्षेत्रम् कथ्यते। शिवमन्दिरार्थं प्रसिद्धं क्षेत्रमिदम्।
वेरिंगवनम्- वन्यजीवानां क्षेत्रम्।
गहपुरक्षेत्रे चायोद्यानस्य कृते विख्यातम् इत्यादयः।
जलप्लावनस्थितिः - ब्रह्मपुत्रनदः अस्याः जिलायाः पार्श्वीयः महानदः वर्तते। तस्मात् प्रतिवर्षं जलप्लावनस्य भयावहा स्थितिः अत्र बाधते, धनजनादिहानिरपि अत्र सम्भवति इति संक्षेपेण अस्याः विश्वनाथजिलायाः परिचयः इति, शम्।

**हिमसंस्कृतवार्ताः , ईदरधीरजः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। स्पेनदेशस्य कन्दुकक्रीडकैः विश्वस्पर्धा जिता। तदनन्तरं ते स्वभारसमैः रक्तवृन्ताकैः पुरस्कृताः।
**काव्या-** नमो नमः नन्दिनि। अहो, रक्तवृन्ताकैः पुरस्कारः अतीव विचित्रः अस्ति! अन्येषु देशेषु अपि विचित्राणि कार्याणि कृतानि। जापान-देशे ग्रीष्म-ताप-रक्षणाय नवीन-यन्त्राणि प्रकाशितानि। जनैः तानि 'मानवशीतकानि' इति उक्तानि।
**नन्दिनी-** आम्, ग्रीष्म-काले तादृशैः शीतकैः आनन्दः अनुभूतः भवेत्। भारत-देशे विहार-राज्ये अपि एकं विचित्रं गृहं निर्मितम्। तत् गृहं पूर्णतया अधोमुखम् निर्मितम्। आगतैः पर्यटकैः तत्र मुहुर्मुहुः तद्गृहचित्राणि गृहीतानि।
**काव्या-** अधोमुख-गृहे परिभ्रमणं तु भ्रमोत्पादकम् अस्ति! अन्ते, समुद्रे अपि काचित् विस्मयकरी घटना दृष्टा। समुद्र-विहारिभिः संशोधकैः एकः चलच्चित्रखण्डः प्रकाशितः। तस्मिन्, कृष्ण- तिमिङ्गिलैः एकः गोल-मत्स्यः क्रीडार्थं खण्डशः कृतः। तैः कृष्णतिमिङ्गिलैः सः मत्स्यः न खादितः। सा तिमिङ्गिल-जातिः केवलं तेन मत्स्येन सह क्रीडितवती अस्ति।

# बालिका विद्यालय, मोतीनगर, लखनऊ इत्यत्र "गृहे गृहे संस्कृतम्" योजनायाः जुलैमासीय-द्वादशदिवसीय-शिक्षणवर्गस्य समापनम्

(संवाददाता – प्रवेशकुमारशुक्लः , लखनऊ)

उत्तरप्रदेशशासनस्य स्वायत्तशासितः उत्तरप्रदेशसंस्कृतसंस्थानम् इत्यस्य सञ्चालनेन प्रवर्तमानायाः "गृहे गृहे संस्कृतम्" योजनायाः अन्तर्गतं जुलैमासीय-द्वादशदिवसीय-संस्कृतभाषाशिक्षणवर्गस्य समापनसमारोहः गुरुवासरे सम्पन्नः। अयं कार्यक्रमः संस्थानस्य कार्यकारी-अध्यक्षस्य मनीषचौहानमहोदयस्य तथा निदेशकस्य प्रेमेन्द्रकुमारगुप्त महोदयस्य निर्देशनान्तर्गतं समायोजितः।लखनऊ-जनपदस्य बालिका विद्यालय, मोतीनगर इत्यत्र विद्यालयस्य प्रधानाध्यापिका डॉ. लीनामिश्रमहोदया स्वीये सम्बोधने उक्तवती यत् संस्थानेन प्रेषिता शिक्षिका डॉ. प्रेरिकाअग्रवालमहोदयायाः प्रभावी-पाठनपद्धत्याः माध्यमेन अस्मिन् शिविरे छात्राः छात्राश्च संस्कृतसम्भाषणस्य समुचितं लाभम् अवाप्नुवन्।मुख्यातिथिः - प्रो. रीतातिवारीमहोदया स्वीये उद्बोधने अवदत् यत् संस्कृतशिक्षणं केवलं व्याकरणपर्यन्तं न सीमनीयम्, अपितु संवादैः, कथाभिः, गीतैः, अभिनयेन, क्रीडाभिः तथा तान्त्रिकमाध्यमैः सह सम्बद्धं करणीयम्। ताभिः उक्तं यत् वेदाङ्गे शिक्षाशास्त्रे तथा पाणिनिशिक्षायां प्रतिपादितैः सिद्धान्तैः अस्याः योजनायाः सुदृढः सम्बन्धः विद्यते। अतः सर्वे प्रशिक्षकाः शिक्षाशास्त्रे वर्णितानाम् उच्चारणस्थानानाम् अनुकरणं कुर्वन्तः छात्रासु संस्कृतभाषायाः प्रति निष्ठां जनयेयुः। संस्कृतभाषा व्यवहारभाषारूपेण अध्यापनीया इत्यपि ताभिः प्रतिपादितम्।कार्यक्रमस्य सञ्चालनं डॉ. प्रेरिकाअग्रवालमहोदया अकरोत्।प्रारम्भे वैष्णवीरावत इत्यनया सरस्वतीवन्दना प्रस्तुता। अन्ते प्रधानाध्यापिका डॉ. लीनामिश्रामहोदया धन्यवादज्ञापनम् अकरोत्। ततः सुमन इत्यनया प्रस्तुतेन कल्याणमन्त्रेण कार्यक्रमस्य समापनम् अभवत्।

